# आदर्शप्रश्नपत्रम् (दशमीकक्ष्या)

## प्राच्यपाठशालानाम् - पद्यभागः

**समयः - ३ घण्टाः** **अङ्काः - १००**

---

## PART - A **70 M**

**I. भावावगमनम् - प्रतिस्पन्दनम्**

**अ. श्लोकं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।** 06M

(1) शुचि भूषयति श्रुतं वपुः
प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रमः
स नयापादितसिद्धिभूषणः ॥

१) वपुः किं भूषयति ?

२) शास्त्रज्ञानस्य किमाभरणम् ?

३) प्रशमस्य आभरणं किम् ?

४) विक्रमः कीदृशः भवेत् ?

५) श्लोकेऽस्मिन् नीतिः का ?

६) ''भूषा'' इति पदस्य समानार्थकपदं लिखन्तु ।

**आ. श्लोकं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।** 06M

(2) व्याघ्रः सेवति काननं सुगहनं सिंहो गुहां सेवते,
हंसः सेवति पद्मिनीं कुसुमितां गृध्रः श्मशानस्थलीम् ।
साधुस्सेवति साधुमेव सततं नीचोऽपि नीचं जनं,
या यस्य प्रकृतिः स्वभावजनिता केनापि न त्यज्यते ॥

१. व्याघ्रः किं सेवति ?

२. सिंहः कां सेवते ?

३. श्मशानस्थलीं कः सेवते ?

४. हंसः कां सेवति ?

५. कीदृशी प्रकृतिः न त्यज्यते ?

६. 'सततम्' इति पदस्य विरुद्धार्थकपदं लिखन्तु ।

**इ) श्लोकं पठित्वा श्लोकस्यास्य प्रतिपदार्थं लिखन्तु ।** 06M

(3) प्राच्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्,
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां,
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ।।

**(अथवा)**

व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मयिनः ।
प्रविश्य हि घ्नन्ति शठास्तथा विधौ,
असंवृताङ्गान्निशिता इवेषवः ।।

**ई) श्लोकं पूरयित्वा भावं लिखन्तु ।** 06M

(4) दानं भोगो ...................... गतिर्भवति ।

**(अथवा)**

यौवनं धनसम्पत्तिः ...............यत्र चतुष्टयम् ।।

(5) **अधः दत्तानि वाक्यानि संघटनाक्रमेण पुनः लिखन्तु ।** 06M

१. तदा सा गृहिणी बलाकायाः पूर्ववृत्तान्तं ज्ञापयति स्म ।

२. एकदा एका बलाका कौशिके पुरीषम् अत्यजत् ।

३. गृहिण्याः विलम्बेन कौशिकः क्रुधः जातः ।

४. ततः सा बलाका तस्य तीक्ष्णदृष्टिप्रभावेन दग्धः अभवत् ।

५. कस्मिंश्चिदरण्ये कौशिको नाम तपस्वी आसीत् ।

६. तेन शोकेन सः भिक्षार्थं समीपग्रामं गतवान् ।

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

**अ. अधः दत्तानां प्रश्नानामुत्तराणि ३-५ वाक्येषु लिखन्तु ।** 4X3=12

(6) 'उपमा कालिदासस्य' इति प्रसिद्धम् । मेघसन्देशमाधारीकृत्य लिखन्तु ।

(7) 'यच्च मनसि चिन्त्यते यच्च कीर्त्यते गिरा' इत्यस्य भावः स्वीयवाक्येषु लिखन्तु ।

(8) धर्मव्याधः किं धर्ममाचरितवान् इति स्वीयवाक्येषु लिखन्तु ।

(9) 'श्रृणोमि वाचं तव दिव्यरूपाम्' इति कहोडः स्वपुत्रं प्रति अवदत् तदा तस्य अनुमतिं स्वीयवाक्येषु लिखन्तु।

**आ. अधः दत्तानां प्रश्नानां समाधानानि निबन्धरूपेण १०-१२ वाक्येषु लिखन्तु ।** 2 x 8 = 16

(10) ‘कनकं चतुर्भिः परीक्ष्यते, एवमेव पुरुषः अपि चतुर्भिः परीक्ष्यते’ एतव्दचनमुद्दिश्य तुलनात्मकतया एकं निबन्धं लिखन्तु ।

**अथवा**

मेघसन्देशे प्रस्तावितानां नगराणां वैशिष्ट्यं स्वीयवाक्येषु लिखन्तु ।

(11) ‘मन्दाकिनी पापनिर्बन्धिनी गगनराण्णन्दिनी’ इति वचनं सर्वदा सत्ययुक्तमिति निरूपयन्तु ।

**अथवा**

रुक्मिणी-सत्यभामयोः पतिभक्तिभेदं निरूपयन्तु ।

**इ. अधः दत्तेभ्यः प्रश्नेभ्यः द्वयोः समाधानानि सर्जनात्मकतया/प्रशंसात्मकतया लिखन्तु ।** 2 x 6 = 12

(12) ‘पुत्रादिच्छेत् पराजयम्’ इति वचनम् अष्टावक्र-कहोडविषये अन्वयं कृत्वा स्वीयवाक्येषु लिखन्तु ।

(13) भवता पठितं प्रसिद्धं काव्यमुद्दिश्य मित्राय पत्रं लिखन्तु ।

(14) नदीनां प्राशस्त्यमुद्दिश्य निबन्धं लिखन्तु ।

## PART - B

**30 M**

## III. भाषांशाः

**अ) रेखाङ्कितपदस्य समुचितं समानार्थकपदं दत्तेभ्यः विकल्पेभ्यः चित्वा लिखन्तु ।**

१) मेघः <u>जलेन</u> पूर्णः सन् श्यामः भवति । ( )

a) वायुना b) वारिणा c) अग्निना d) गगनेन

२) महात्मनः <u>विपदि</u> धैर्यं न त्यजन्ति । ( )

a) पुण्यकाले b) ग्रीष्मकाले c) शरत्काले d) कष्टकाले

३) भारतदेशे <u>मन्दाकिनी</u> परमपवित्रा नदी । ( )

a) गङ्गा b) महानदी c) गोदावरी d) नर्मदा

**आ) रेखाङ्कितस्य पदस्य समुचितं विरुद्धार्थकपदं विकल्पेभ्यः चित्वा लिखन्तु ।**

४) मान्धाता इति महाधार्मिकः <u>पुरा</u> भारतदेशं अपालयत् । ( )

a) नवीनम् b) कदाचित् c) अधुना d) तदानींतन

५) अविवेकी पुरूषः स्वचेष्टाभिः <u>अपकीर्तिं</u> प्राप्नोति । ( )

a) गौरवम् b) कीर्तिं c) वैभवम् d) विनोदम्

६) मदगजः <u>मन्दं</u> चलति । ( )

a) वेगेन b) भागेन c) भङ्गेन d) तुन्देन

**इ) रेखाङ्कितपदस्य समुचितां विभक्तिं चिन्वन्तु ।**

७) <u>गुणाः</u> पूजास्थानं न तु वयः । ( )

a) तृतीया विभक्तिः b) चतुर्थी विभक्तिः c) षष्ठी विभक्तिः d) प्रथमाविभक्तिः

८) शकुन्तलायै <u>वध्वै</u> वनदेवताः आभरणानि यच्छन्ति । ( )

a) षष्ठी विभक्तिः b) सातमी विभक्तिः c) चतुर्थी विभक्तिः d) द्वितीया विभक्तिः

**ई) समुचितं क्रियापदं चित्वा लिखन्तु ।**

९) सुधीरः श्वः रामं ..................... । ( )

a) मिलन्ति b) मेलिष्यति c) मिलामि d) मिलेम

१०) उत्तमः शिष्यः सदा गुरुं .................... । ( )

a) पुच्छति b) अपृच्छत् c) पृच्छसि d) पृच्छामि

**उ) निर्देशानुसारं लिखन्तु ।**

११) गुणसन्धेः पदं चिन्वन्तु । ( )

a) साधुरेव b) सुखोपविष्टः c) एतदर्थम् d) चैव

१२) ''दिव्यौषधैः'' - अस्य पदस्य सन्धिनाम चिन्वन्तु । ( )

a) पूर्वरूपसन्धिः b) सवर्णदीर्घसन्धिः c) वृद्धिसन्धिः d) यणादेशसन्धिः

१३) विशेषणपूर्वपदकर्मधारयसमासस्य सम्बद्धं पदं चिन्वन्तु । ( )

a) नीलोत्पलम् b) दुर्भिक्षम् c) अनर्थः d) जपदानयोः

१४) ''पुरुषव्याघ्रः'' - अस्य पदस्य समासनाम लिखन्तु । ( )

a) बहुव्रीहिः b) द्विगुः c) उपमानोत्तरपदकर्मधारयः d) द्वन्द्वः

१५) ''विलयानलाभीलफालानलज्वालमालिका .........'' अस्मिन् वाक्ये कः शब्दालङ्कारः विद्यते ? ( )

a) लाटानुप्रासः b) वृत्त्यानुप्रासः c) मुक्तपदग्रस्तः d) छेकानुप्रासः

१६) वाक् + इव ............................................ (सन्धिं कृत्वा सन्धिनाम लिखन्तु ।) 1 x 1 = 1

१७) शठोऽसौ .................... + .................... (सन्धिविच्छेदं कृत्वा सन्धिनाम लिखन्तु ।) 1 x 1 = 1

१८) मातुलश्च भागिनेयश्च । (समस्तपदं समासनाम च लिखन्तु ।) 1 x 1 = 1

१९) उपग्रामम् । (विग्रहवाक्यं, समासनाम च लिखन्तु ।) 1 x 1 = 1

**ऊ) अधः दत्तानि पदानि उपयुज्य नूतनवाक्यानि लिखन्तु ।** 3 x 1 = 3

२०) प्रतिदिनम् -

२१) सन्देशः -

२२) मित्रम् -

**ऋ) निर्देशानुसारं लिखन्तु ।** 2 x 1 = 2

२३) परमभक्तः प्रह्लादः .................. (हरि) रक्षितः । (हरिशब्दस्य तृतीया - एकवचनम्)

२४) गुरुः शिष्येभ्यः नीतिकथां अकथयत् । (बहुवचने परिवर्तय)

**ॠ) अधः दत्तस्य श्लोकपादस्य अलङ्कारनिरूपणं कुर्वन्तु ।**

२५) 'मेधां बुधः सुधामिन्दुः बिभर्ति वसुधां भवान् ।' 3M

**ए) अधः दत्तस्य श्लोकपादस्य गुरुलघुनिरूपणं गणविभजनञ्च कृत्वा वृत्तनिर्देशं कुर्वन्तु ।** 3M

२६) ''पुराधिरूढः शयनं महाधनम्''

*****
***
*